International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# राष्ट्रीय शिक्षा नीति 2020; एकविंशतितमे शतके भारते च उच्चशिक्षायाः भविष्यम्

**Dr. Laxman Kumar**

Assistant Professor, Department of Education, National Sanskrit University,(A Central University), Tirupati, Andhra Pradesh, India

**शोधसारांशः**

एकविंशशताब्द्यां भारतदेशेन वैश्विकनेतृत्वप्रदानाय भारतीयभावबोधस्य तथा मूल्यपरम्परायाः आवश्यकता आसीत्। तस्यानुसन्धानकाले नवयुगानुकूलनिर्मिता आसीत् एका शिक्षानीतिः। आगामिनि काले इयं शिक्षानीतिः भारतीयस्पर्धाभ्यः चिन्तनेभ्यश्च निवर्तने स्वतःसिद्धा भविष्यति। तथा भारतीयतां भारतभावं च विस्तारयिष्यति। इयं नूतना शिक्षानीतिः २०२० संवत्सरं यावत् सम्यगस्ति। यतोहि अखिलरूपा आयम्यरूपा वहुविषयिणी च इयं शिक्षानीतिः एकविंशतिशताब्द्यनुगुणाय निर्मितास्ति। राष्ट्रीयशिक्षानीतेः(२०२०) प्रारम्भकालादेव भारतीयशिक्षाङ्गणे नूतनयुगस्य प्रारम्भः भविष्यति। इयं तु प्राचीनापेक्षया उत्कृष्टास्ति तथा नवभविष्यनिर्माणं च करिष्यति। एन्.ई.पि. (२०२०) उत्कृष्टदूरदृष्टेः परिणामोऽस्ति। पुनश्च प्रेरणादायकनीतिविधिकलेख्योऽप्यस्ति यः भारतीयोच्चशिक्षायाः परिदृश्ये मूलभूतपरिवर्तनस्य प्रारम्भनं करिष्यति। एतदन्तर्गतायाः भारतीयोच्चशिक्षाप्रणाल्याः काठिन्यताः स्पर्धाश्च च सौधर्म्येण स्पष्टतया च अवगताः। एतदन्तर्गततया मानवविकास्य असाधारणक्षमतायाः जनसांख्यिकीलाभांशस्य च उपभोगाय, महत्परिवर्तनाय एका परिकल्पना कृतास्ति। इयं परिकल्पना आभारते बहुलतया उपलप्स्यते।

ज्ञानं प्रज्ञा सत्यं चेति भारतीविचारपरम्परायां दर्शने च सदा सर्वोच्चमानवयीलक्ष्यत्वेन चिन्त्यन्ते। भारतवर्षं भारतीयतां च प्रति विश्ववासिनामास्थास्ति। विश्वगुरुत्वेन अस्य प्रतिष्ठायां ये प्रधानभूताः हेतवः सन्ति ते यथा समृद्धज्ञानं,चिन्तनपरम्परा, तन्निवृत्तं सूत्रं मार्गश्चेति। स्वकीयविशिष्टबलेनैव सदैव संसारमार्गं प्रदर्शयति। भारतवर्षे तादृशी शिक्षाव्यवस्था वर्तते या तु सर्वांगीणविकासे महत्त्वं ददाति। अनया व्यवस्थया जनानां चारित्रिकगुणैः नैतिकगुणैश्च सह सामाजिकभावना अपि विकसिता भवति। एवंरूपेण अग्रिमकाले इमां संस्कृतिं सभ्यतां च संरक्षयन् उत्तमनागरिकरूपेण सामाजिकपरिस्थितेः परिवर्तनं साधयित्वा राष्ट्रियसुरक्षार्थं स्वप्राणान् अपि आहुतिदाने तत्पराः सन्ति। राष्ट्रियैकतायाः, भावात्मकैतायाः, सामाजिककुशलतायाः, राष्ट्रियानुशासनादिभावनानां विकासे सहायको

भवेत्। सामाजिककर्त्तव्यपालनपुरस्सरं राष्ट्रहिताय संलग्नो भवेत्। प्राचीनशिक्षाव्यवस्था आधुनिकशिक्षाव्यवस्थापेक्षया अधिकोत्कृष्टा समुन्नता चासीत्, किन्तु कालान्तरे इयं शिक्षाव्यवस्था ध्वस्ता। वैदेशिकैः शत्रुभिः भारतीयसनातनधारामवरुद्ध्य शिक्षाव्यवस्था नाशितासीत्। तदनन्तरं प्राग्वत् नैव विकसितेयं शिक्षाव्यवस्था। स्वतन्त्रतान्दोलनस्य अनन्तरमेव इमां शिक्षामाधारीकृत्यैव बहवः सङ्घर्षाः अभवन्। स्वतन्त्रताकालानन्तरं भारतसर्वकारेण सार्वजनीकशिक्षायाः प्रसाराय प्रचाराय च प्रयासहः विहितः किन्तु तत्रापि अल्पीभावः आसीत्। आध्यात्मिकमूल्योपरि अधिष्ठिता अस्माकं प्राचीनशिक्षाव्यवस्था मैकालेशिक्षानीतिप्रभावेण उपेक्षितासीत्। अनेन भारतीयशिक्षाव्यवस्थाया महती क्षतिरभवत्। तत्रेयं नूतना शिक्षाव्यवस्था उत्साहजनकास्ति। अस्याः व्यापकता दूरदर्शिता चेति स्पष्टतः द्रष्टुं शक्यते। भारतीयपरिवेशानुकूला परम्परानुकूला च इयं शिक्षानीतिः भारतीयतायाः प्रतिष्ठादृष्ट्या अत्युत्तमा निर्णीतास्ति। एकविंशतीशताब्द्यां भारतवर्षस्य प्रथमायाम् अस्यां महत्वाकांक्ष्यां शिक्षानीतौ भारतीयपरम्परां सांस्कृतिकमूल्यं च अविकलयन् नूतनशतकीयशिक्षायाः आकांक्षात्मकलक्ष्यं प्राप्तुं विविधाः उपायाः विहिताः सन्ति। भारतीयज्ञानपरम्परा-संस्कृतिसम्बन्धितमस्कां ऐहित्यं संरक्षितुं, तदनुसन्धातुं, बहुज्ञतां वर्धितुं, समग्रशिक्षायाः भूमिकानिर्माणे, भारतयीभाषाः शिक्षिप्रक्रियामाधाररूपेण संयोजितुं शिक्षायाः प्रत्येकस्मिन् स्तरे समन्वयवर्द्धनशालिनी तथा सदा मूल्याङ्कन-बहुभाषिकता-स्वायततादीन् प्रोत्साहनं कुर्वन्ती भारतीयपरम्परापरिवेशयुगानुसारी इयं शिक्षानीतिः सर्वथानुकूला एव वर्तते।

**प्रस्तावना-**

प्राचीनकालादेव भारतवर्षे शिक्षां प्रति अधिकजागरूकभावः प्रदर्शितोऽस्ति। वैदिककालादेव गुरुकुलेषु पारम्परिकरूपेण शिक्षादानं भवति स्म। स्वशक्त्यनुभवने शिक्षा साहाय्यं करोति। एवंप्रकारेण शक्तिशाली संघवद्धश्चेति समाजः निर्मीयते। इयं शिक्षानीतिः ब्रिटिश-ऐतिह्यं दूरीकृत्य एकविंशतिशताब्द्याः आवश्यकतानुरूपा अनुकूला च भवति। भारतस्य शक्तिः वैश्विकशक्तित्वेन परिणतास्ति। (2)अस्यां नीतिशिक्षायां परिवर्तनदिशि महत्वपूर्णं चिन्तनमस्ति। एवं विद्यार्थीनामात्मनिर्भरत्वं सम्पादने इयं तु लक्ष्यानुरूपा वर्तते। अनया तमसः बन्धनात् च मुक्तो भवति, मार्गश्च प्रशस्तो भवति। जीवनस्य अलौकिकत्वं कृत्वा सशक्तविधानम्, पठनवेलायां बालकाः सदैव स्मरेयुः यत् एकः सुनागरिकः भूत्वा समाजस्य उत्तराधिकारत्वेन राष्ट्रस्य नेतृत्वप्रदानं निर्माणं च करणीयम्। एते सर्वे गुणाः अस्यां नूतनशिक्षानीतौ समाविष्टाः सन्ति। उच्चतरशिक्षायां संस्थागतपुनर्गठनं, सङ्घननक्रमेण वर्धितबहुविषयकविश्वविद्यालयानां निर्माणम्, उच्चतरशिक्षासंस्थानसमूहनिर्माणम् इत्यादिभिः सम्बन्धिताः संस्तुतीः संशुद्ध्य नूतनमार्गं निर्माति। २०३० ख्रीष्टाब्दः इति कालावधौ प्रत्येकस्मिन् जिलायां न्यूनातिन्यूनरूपेण बहुविषयकशिक्षासंस्थानं करणीयम् इति संकल्पः अस्यां शिक्षानीतौ व्यक्तोऽस्ति। उच्चतरशिक्षायां नियामकसंस्थायाः एव महती भूमिका वर्तते। अस्माभिः या प्रणाली विकसितास्ति सा कृत्रिमा विघटकारी चास्ति। एतासु नियामकसंस्थासु समन्वयस्य

सदाभावः परिदृष्टः। उच्चतरशिक्षायाम् अस्य प्रतिकूलप्रभावः आपद्यते। अभावमेनं दूरीकर्तुमस्यां शिक्षानीतौ एतादृशानां संस्थानां अल्पीभावदूरीकरणं, कासाञ्चन संस्थानामधिकशक्तेः केन्द्रीकरणं, अनयोः मध्ये हितानां संघर्षः, दायित्वाभावः, पारस्परिसमन्वयाभावादीन् दूरीकर्तुं प्रयत्नःकृतः। अस्यां शिक्षानीतौ प्राचीना शिक्षानीतिः निहितास्ति किन्तु अन्यानि गुरुत्वपूर्णानि कार्याणि संयोजितुं प्रयासः संकल्पश्च अत्र दृष्टः। अत्र ज्ञानविज्ञानयोः एका विशिष्टा प्रणालीनिर्माणस्य प्रयासः कृतोऽस्ति यत्र जनानां क्षमता, रुचिः, उपार्जनावसरः, प्रशिक्षणमित्यादयः सर्वे विस्तृतरूपेण अवलोकिताः सन्ति। वर्तमाननीत्यनुसारं १५.५ अनुच्छेदे ४ वर्षीयाः, २ वर्षीयाः, १ वर्षीयः इति शिक्षाशास्त्रीकार्यक्रमस्य रूपरेखा प्रस्तुतास्ति। अत्र ४ वर्षीयशिक्षकशिक्षाकार्यक्रमः १२ कक्ष्यायाः अनन्तरं विद्यार्थीनां कृते अस्ति। २ वर्षीयशिक्षाशास्त्रीकार्यक्रमः विशिष्टविषये ३ वर्षात्मककालस्नातकादनन्तरं विद्यार्थीनां कृते विहितोऽस्ति। १ वर्षीयशिक्षाशास्त्रीकार्यक्रमः विशिष्टविषये ४ वर्षात्मककालस्नातकादनन्तरं विद्यार्थीनां कृते विहितोऽस्ति। अस्यां शिक्षानीतौ इदमपि संयोजितं यत् शिक्षाशास्त्रीकार्यक्रमहेतोः राष्ट्रियस्तरपरीक्षायाः आयोजनं करिष्येते। सर्वे शिक्षणप्रतिष्ठानादयः बहुविषययुताः निर्माणीयाः येन प्रशिक्षणकार्यक्रमस्य संचालनं सुलभतया भवेत्। शिक्षणसंस्थानस्य विशिष्टविषयेषु विशेषज्ञानामुपलब्धता अध्यापकैः सुनिश्चिता कर्तव्या। शिक्षासंकायसदस्यानां व्यक्तिविवरणेषु विविधताः स्थापनीयाः। (१५.९) विद्यावारिधिप्रविष्टाः कर्तारः स्वशोधकार्यकाले शैक्षणिकप्रक्रियाभिः सह शिक्षणानुभवस्य न्यूनतमं समयं च निर्धारयिष्यन्ति। शिक्षासंस्थानस्य संकायसदस्येभ्यः प्रौद्योगिकज्ञानविकासाय प्रशिक्षणं दातव्यम्। दुर्बलवर्गीयानां प्रक्षिणार्थं छात्रवृत्तेः व्यवस्थापि अस्ति।

**उच्चशिक्षायाः भविष्य**

पूर्ववर्तिनः केचन आक्षेपाः असमाहिताः प्रश्नाश्च अस्यां शिक्षानीतौ सन्ति। सर्वाः संस्थाः बहुविषययुताः भवेयः इति उक्तं किन्तु तत्करणे का प्रक्रियास्ति? तस्य आदर्शः मानको वा किमस्ति? प्रसङ्गेऽस्मिन् चर्चा एव न जाता। राष्ट्रियस्तरे गुणवत्तावर्धनाय विक्षिप्तेषु शैक्षणिकसंस्थानेषु गुणवन्तः शिक्षकाः कथं नियोजितव्याः? तत्र ध्यानमेव नास्ति यत् एते शिक्षकाः एव भाविशिक्षकान् निर्मास्यन्ति। भारतवर्षे ४ वर्षीयशिक्षाशास्त्रीपाठ्यक्रमः एन्.सी.ई.आर्.टी इत्यस्य आर्.आइ.ई इत्यत्र बहुलतया प्रागेव प्रचलन् अस्ति। अस्य का उपलब्धिः? किमस्मिन् विषये ध्यानं दत्तम्? शिक्षकशिक्षापोजिशनपेपर् (२०१०) इत्यत्र उक्तं यत् एन्.सी.ई.आर्.टी. द्वारा संचालितः शिक्षाशास्त्रीपाठ्यक्रमोऽपि शैक्षणिकोद्देश्यं पूरयितुं न पारयति। तथापि समग्रभारते ४ वर्षीयशिक्षाशास्त्रीपाठ्यक्रमस्य परिचालनस्य व्यवस्था क्रियमाणास्ति। एकवर्षीयशिक्षाशास्त्रीपाठ्यक्रमः किमर्थं स्थगितः नास्ति तत्र कारणम्। यथा देशे बी.टी.सी., डी.एल्.एड्, डिप्लोमा इत्यादिषु स्तरभदोऽस्ति तथैव ४ वर्षीयशिक्षाशास्त्रीकार्यक्रमः,२ वर्षीयशिक्षाशास्त्रीकार्यक्रमः, १ वर्षीयशिक्षाशास्त्रीकार्यक्रमः इति एते भवितुमर्हन्ति। केन्द्रसर्वकारस्य राज्यसर्वकारस्य कार्यहेतोः आफलके एव स्वात्मानं पश्यन्ति। प्रसङ्गेऽस्मिन् राष्ट्रियस्तरे एकस्याः प्रवेशपरीक्षायाः कृते प्रयासोऽस्ति। किन्तु अनया परीक्षया किं राज्यानां सांस्कृतिकमहत्त्वं संरक्ष्यते? प्रसङ्गेऽस्मिन् न चर्चितम्। अध्यापकशिक्षायां प्रवेशनार्थमेकस्याः राष्ट्रियपरीक्षायाः आयोजनाय पूर्वव्यवस्था करणीया। आवश्यकतानुसारं अस्याः परीक्षायाः व्यवस्था पूर्वे राज्यसर्वकारैः क्रियते स्म। तत्र साफल्यं च लब्धम्। केन्द्रसर्वकारैः प्रवेशपरीक्षसम्बन्धितं मानकं सुनिश्चितं करणीयम्। तदर्थं एका समितिः अपि निर्मातव्या। न चेत् राष्ट्रियस्तरपरीक्षायां भागग्रहीतारः विविधराज्येभ्यः आगताः छात्राः काठिन्यतामनुभविष्यन्ति। राष्ट्रीयशिक्षनीतिः(२०२०) इत्यनुसारं छात्राणां कृते प्राथमिकस्तरे माध्यमिकस्तरे च मातृभाषया शिक्षादानं करणीयम्। किन्तु नेदं समीचीनम्। मातृभाषां पाठयतां शिक्षकानां विषयेऽस्मिन् उल्लेखः एव नास्ति। यदि मातृभाषया अध्यापनं कर्तुमिच्छति तदा अध्यापकाः तस्यामेव भाषायां निष्णाताः भवेयुः। शिक्षणनिर्देशनं, परीक्षाः, शिक्षणप्रविधिः, मूल्याङ्कनं सर्वं मातृभाषया एव भवति। एवंप्रकारेण विविधासु मातृभाषासु शिक्षणपद्धतिः प्रारप्स्यते। तथा सर्वे उद्यताः अपि भवन्ति। अस्माभिः आदौ एव ज्ञातं यत्सर्वासु संस्थासु हिन्दी-आंग्लभाषयोः प्रभावबलेन शिक्षणसामग्रीसम्बन्धीसमस्याः सोढव्याः। मातृभाषया शिक्षयन्ति ये शिक्षकाः तेषां नियोगकरणस्य दायित्वं राज्यसर्वकारस्योपरि तथा केन्द्रसर्वकारस्योपरि आपद्यते। किन्तु अयमवकाशस्य प्रारम्भः शिक्षणसंस्थाभ्यः एव भवति। कतिसंख्यकाः मातृभाषानिष्णाताः अध्यापकाः नियोक्तव्याः। एवञ्च केनाधारेण विद्यार्थीनां नामांकनं भवेत्। यथा शिक्षकानां व्यक्तिविवरणे विविधता उक्तास्ति। तेन च विद्यावारिधिः अपि आवश्यकी इति नोक्तम्। तदा किं शिक्षणस्य गुणवत्तया सह सहचारः न भवति? एतन्नीत्यानुसारं शिक्षाक्षेत्रे विध्यावारिधिं कुर्वन् शोधकर्ता स्वशोधविषयानुगुणाः कक्षाः स्वीकुर्यात्। इदं तु शोधकर्त्रा प्रतिवेदनसमर्पनवत् भाति। प्रतिवेदनमिदं कुत्र समर्पणीयम्? शिक्षणं कदा कुत्र च दातव्यम्? किमिदं तेषां छात्राणां कृते उपयुक्तमस्ति? किमिदं शोधकर्तुः शोधकार्यस्ये गुणवत्तायां प्रभावं विस्तारयष्यति? एतादृशाः प्रश्नाः आदौ एव अस्माभिः चिन्तनीयाः। 'बहुविषयकम्' इति उच्यमानायामस्यां शिक्षानीतौ शिक्षकनियोगविषयकः वार्तालापः नास्ति। यथा वर्तमानकालिकविद्यालयशिक्षायाः आवश्यकतानुसारं शिक्षकानां योग्यता निर्धार्यते। तत्र विषयानां संयोजनमपि अस्ति। किन्तु भाविनि काले शिक्षकानां नियोगे योग्यता निर्धार्यते उत न तन्न चर्चितम्। यदि इतिहासविषयस्य शिक्षकस्य स्नातके भूगोल-अर्थशास्त्र-राजनीतिविज्ञानानां स्थाने संगीतादयः अन्ये विषयाः भवन्ति चेत् किं कक्षास्वीकरणवेलायां सः न्यायं करिष्यति? बहुविषयकव्यवस्थायां कथं सामाजिकविज्ञानस्य आत्मा स्थापयितुं शक्यते? भविष्यत्काले योग्यतायाः नकारात्मको प्रभावो भविष्यति। बहुविषयकयोग्यता इति नाम्ना संख्यामात्रं दृश्यते किन्तु गुणवत्ता नश्यति। अध्यापकशिक्षायाः आलोकनं यथा – बहुविषयकशिक्षणं, संस्थानसंकायसदस्यानां योग्यता-गुणवत्तयोः वार्तालापः जातः। किन्तु समावेशीशिक्षायाः वर्धनाय विशिष्टविद्यार्थीनां शिक्षकानां शिक्षणे ध्यानं न दत्तम्। तथा विशिष्टविद्यार्थीनां नाम दिव्यांगानां कृते अध्यापकशिक्षा प्रदाने अवसरस्य चर्चा एव न भवति।

**भविष्य तथा क्रियान्वयनम्**

अस्यां शिक्षानीतौ प्रावधानमात्रे उपावरणकरणापेक्षया प्रभावीभवनस्य प्रागनन्तरयोः अवकाशं ध्यायेत्। अनेनैव सफलो भवति। न चेत् धरातलगमनात्प्रागेव समाप्तो भवति। अध्यापकशिक्षायाः रूपरेखा भविष्यसंस्थाननिर्माणं मानकञ्च, उपयुक्तमानवसंसाधनस्य परिचितिः, शिक्षकसंस्थानस्य मूल्याङ्कनं कठोरपर्यवेक्षणं, शिक्षकनियोगस्य नियमस्थितिः, समावेशीप्रवृत्तिः, शोधकर्तुः शोधस्य च गुणवत्ता, राज्यं, विद्यालयशिक्षा इत्यादि विषयान् ध्यात्वा अध्यापकशिक्षायाः पाठ्यचर्चानिर्माणे तथा

भाषासम्बन्धसमस्यानां समाधाने ध्यानं दातव्यम्। किं वर्तमानशिक्षा नागरिकानां सर्वं प्रयोजनं पूरयति। अनेन जनाः समाजे कार्यशीलतया सृजनात्मकतया सहायतां कुर्वन्ति। तथा स्वयं लाभान्विताः भवन्ति। एतादृशानां सहस्रसंख्यकानां प्रश्नानामुत्तराणि यदि न स्युः तदर्थमेव ३४ वत्सरेभ्यः अनन्तरं इयं शिक्षाप्रणाली सर्वकारैः उद्घोषितास्ति। अनया नीत्या १३८ संख्यकानां भारतीयानां भविष्यनिर्माणं भवति। अतः पार्टी हितार्थं शिक्षानीतेः विषये चर्चति। तदैव वयं शक्तिशालिनीं शिक्षानीतिं निर्मातुं शक्नुमः। २०२० ख्रीष्टाब्दस्य १ अगस्त इति दिनाङ्के टी. एन्. नायननमहोदयः स्वलेखे उक्तवान् - "मोदीसर्वकारस्य इयं नूतना राष्ट्रीयशिक्षानीतिः कोठारीप्रतिवेदनापेक्षया महत्वपूर्णास्ति। अत्र सकारात्मः वार्तालापोऽस्ति। (टी. एन्. नायननः आर्टिकेल् The Print, 1 August, 2020)"। नूतनायाः शिक्षानीतेः प्रारूपे महतीं भूमिकां पालयतः मानवसंसाधनमंत्रालयस्य सचिवेन श्री-अमित-खरेमहोदयेन उक्तं यत् "उच्चशिक्षायां बहुवारं संशोधनं कृतमस्ति। तत्र ग्रेडेड् एकाडेमिक्, प्रशासनिकं ,वित्तीयस्वायत्ततादयः सन्ति। नूतनशिक्षानीतिप्रणयनान्तरं संशोधानन्तरं वयं २०३५ ख्रीष्टाब्दं यावत् ५०% सर्वं नामाङ्कनम् अनुपातं(GER) च प्राप्नुमः। " अमितमहोदयेनोक्तम् मल्टिपल् एंट्री तथा एग्जिट् सिस्टम् इत्यत्र प्रथमवर्षानन्तरं सर्टिफिकेट्, वर्षद्वयानन्तरं डिप्लोमा, वर्षत्रयानन्तरं उपाधिः(डिग्री) लभ्यते। ४ वर्षात्मककार्यक्रमानन्तरमाचार्यं विशिष्टाचार्यं विना च साक्षात् विद्यावारिधिं कर्तुं शक्यते। पुनश्च विशिष्टाचार्यः नूतनशिक्षानीतौ स्थगितोऽस्ति। वर्तमानशिक्षानीतौ किञ्चित् वैगुण्यमस्ति। तदर्थं केचन बिन्दवः द्रष्टव्याः। यतोहि वयं तत्र स्नातकशिक्षायाः समस्याः, संशोधनम्, अवसरः इति विषयान् चर्चिष्यामः। अल् इंडिया सर्वे आफ् हायर् एडुकेशन्(ऐश्) (२०१८-२०१९)इत्यस्य प्रस्तुप्रतिवेदनानुसारं सम्पूर्णभारते शैक्षनिकसंस्थाः त्रिधा विभक्ताः सन्ति। यथा – विश्वविद्यालयः, महाविद्यालयः, प्राइवेड्(स्टैंड-अलोन)संस्था चेति। अखिलभारते विश्वविद्यालय-महाविद्यालयीयव्यवस्थायाः प्रतिवेदनानुसारं ९९३ विश्वविद्यालयाः, ३९९३१ महाविद्यालयाः, १०७२५ स्टैंड-अलोनसंस्थाः सन्ति। ९९३ विश्वविद्यालयेषु २९८ विश्वविद्यालयाः संबद्धताप्राप्तमहाविद्यालयैः युक्ताः, ३८५ प्राइवेट् विश्वविद्यालयाः, ३९४ विश्वविद्यालयाः ग्रामाञ्चले स्थिताः सन्ति। कतिपयान् विहाय सर्वे विश्वविद्यालयाः पारंपरिकरूपेण प्रत्यक्षमाध्यमेन शिक्षादानं कुर्वन्ति। तत्र १ केन्द्रीयविश्वविद्यालयः, १४ स्टेट् ओपेन् विश्वविद्यालयः, १ स्टेट् प्राइवेट् ओपेन विश्वविद्यालयः, ११० दूरशिक्षाप्रदातारः विश्वविद्यालयाः सन्ति(The Print, आर्टीकल् 07-07-2020)। नूतनशिक्षानीतौ ४ वर्षीयस्नातकपाठ्यक्रमस्य प्रयोगार्थमुद्घोषणं जातम्। इदमुद्घोषणं क्रान्तिस्वरूपमैतिहासिकञ्च वर्तते। ३ वर्षीयस्नातकार्यकमः यदि ४ वर्षीयस्नातककार्यक्रमत्वेन परिणमते तदा जगत्यस्मिन् विद्यमानेषु विश्वविद्यालयेषु प्रचल्यमानेन पाठ्यक्रमेण सह साम्यता स्थापिता भवति। अनेन लक्षाधिकानां भारतीयछात्राणां वैदेशिकशिक्षाग्रहणे क्लेशः एव न भवति। भारतीयविश्वविद्यालयेषु कलाविद्या, विज्ञानं, अर्थनीतिः इति स्नातके डिग्रीकोर्स् सन्ति। गत १० वर्षाणि यावत् पाठ्यक्रमे मानवसंसाधनमंत्रालयैः संशोधनकार्यः प्रारब्धः,२०१५ संवत्सरे समग्रदेशस्य विश्वविद्यालयेषु सीबीसीएस् पाठ्यक्रमः तथा २००९-१० संवत्सरे षाण्मासिकपरीक्षायाः व्यवस्था च प्रारब्धमस्ति। सीबीसीएस् पाठ्यक्रमस्य शिक्षाविद्भिः तथा शिक्षकैः विश्वविद्यालयस्य पाठ्यक्रमनिर्माणस्वायत्तता नाशस्य संदर्भः २०१५ संवत्सरे आलोचितोऽस्ति। विश्वस्य प्रसिद्धविश्वविद्यालयेषु पाठ्यक्रमनिर्माणे स्वायत्ततास्ति। ३ वर्षीयस्नातकपाठ्यक्रमः इति समस्यान् दूरीकरणेनैव ४ वर्षीयीपाठ्यक्रमस्य प्रारम्भनं भवति। यथा भारतीयविश्वलयाः स्नानकपाठ्यक्रमे स्वप्रासंगिकतां लुप्तवन्तः। छात्राः स्नातकपाठं समाप्य जीवोपार्जने अनर्हाः भवन्ति तथा वैयक्तिकसंस्थानेषु लक्षाधिकरूप्यकव्ययकरणेन उपाधिं स्वीकुर्वन्तीति सहस्राधिकं प्रतिवेदनं भारतीयस्नातकपाठ्यक्रमविषये आगच्छति। स्नातकपाठ्यक्रमे कथं ४ वर्षीयपाठ्यक्रमः सर्वकारैः शिक्षाविद्भिः च स्थापयितुं शक्यते इति नूतनशिक्षानीतेः महती प्रतिज्ञास्ति। नूतनशिक्षानीतौ ३ वर्षीयस्नातकपाठ्यक्रमस्य महत्वपूर्णाः समस्याः स्पष्टीकृताः सन्ति। कौशलविकासे न्यूनबलप्रदानं, व्यवसायिकशिक्षाभावः, बहुविषयकस्नातकशिक्षायाः न्यूनता, महाविद्यालयेषु शोधशिक्षाभावः तथा विश्वविद्यालयैः सह अगुणितमहाविद्यालयसम्बन्धजनितानां समस्यानां समाधानामस्याः शिक्षानीतेः प्रलेखे ९.२ तथा ९.३ इति उभयत्रास्ति(नूतनशिक्षानीतिः,२०२०, पृ. - ५३)। इमां नीतिं प्रयोक्तुं प्रागेव सर्वकारैः चिन्तनीयं यत् शिक्षकानां सम्मानजनका वृत्तिः तथा सौविध्यमिति देयम्। वर्तमानभारते शिक्षकानां वेतनसंदर्भे उच्यते यत् राज्यसर्वकारस्य केन्द्रीयसर्वकारस्य च लक्षाधिकाः शिक्षकाः अतिथिशिक्षकत्वे, एडहॉकशिक्षकत्वेन तथा शिक्षकमित्रत्वेन न्यूनवृत्त्या एव कार्यं कुर्वन्तः सन्ति। तत्र नोक्तं यत् कथमेतेषां वेतनवृद्धिः भवेत्? शोधक्षेत्रविषये नूतनशिक्षनीतौ चर्चितमस्ति। नूतनतया शोधविश्वविद्यालयानां स्थापनं भवति यत्र शोधकार्ये अधिकतया जागरूकता तथा संसाधनोपभोगो भवति। सङ्कलश्रवणे लेखने च समीचीनमिति भाति किन्तु व्यहारिकतया तत्प्रयोगे अल्पीभावः स्पष्टो भवति। रिसर्च फोकस् यूनिवर्सिटी इत्यस्य चिन्तनं किञ्चिद्भिन्नमस्ति। घोषितशिक्षानीतिः व्यवहारिकरूपेण विश्वविद्यालयेषु महाविद्यालयेषु च प्रयोक्तव्यास्ति। इमां शिक्षानीतिं प्रयोक्तुं नूतनशिक्षासंस्थानानां निर्माणविषये चर्चा जातास्ति। इमां शिक्षां प्रसारयितुं प्रयुक्तं च भारतसर्वकारैः निर्मितासु संस्थासु का समस्या उद्भूता। संदर्भेऽस्मिन् दिल्लीविश्वविद्यालयस्य पूर्वतनकुलतयः दिनेशसिंहवर्याः उक्तवान् यत् "निश्चितरूपेण एनईपी संस्था अतिमहत्वपूर्णास्ति तथा एनएचईआरसी इति गठने सहायतां कृतवती। इदं तु मूलभावनानुरूपमस्ति। अनेन सह प्रारम्भे युजीसी इत्यस्यापि निर्माणं जातमसीत्। यतं परिकल्पितं तथैव संस्थाकर्मभिः एव महत् किमपि भवेत्। यदि मध्ये लक्ष्यभ्रष्टः स्यात् तर्हि यूजीसी इति संस्थावत् क्षतेः सम्मुखीनं भवति। अतः तत्कालिकसर्वकारस्य इदं दायित्वं यत् संस्थानं समयानुसारं स्वोपयोगितां न लोपयेत्(The Print आर्टिकल, प्रोफेसर् दिनेशसिंहः)"। तदा समस्याः अल्पीभावान् च दृष्ट्वा नूतनसंस्थानां निर्माणविषये चर्चा प्रारब्धासीत्। अनन्तरं कपिलसिब्बलमहाभागेन(मानवसंसाधनमंत्री)२००९ अनन्तरं तज्जातम्। यूजीसी तथा अन्याः संस्थाः नाशयित्वा यूपीए(२००४-१४)सर्वकारेण कृतमिदम्। वर्तमानसमये यूजीसी तथा अन्याः याः संस्थाः कार्यं कुर्वन्ति ताः एव अस्माकं समये व्यर्थाः आसन् इति पूर्णसहमतिः। एतत् सर्वं दृष्ट्वा नूतनसंस्थायाः परिकल्पना जाता। नेदं संस्थानां वैयर्थम्। सर्वकारैः अशिक्षकनियोगे तथा अप्रशासनिकाधिकारिनियोगेण च संस्थायाः तथा शिक्षायाः एव महती क्षतिः जातासीत्। अतः संस्थासु नियुक्तशिक्षकानां विषयोऽपि सर्वकारैः ध्यातव्यः। प्रशासनिकरीत्या शिक्षासंस्थापरिचालनमिति चिन्तनात् बहिरागतव्यम्। संस्थानां शिक्षाज्ञानशोधसंबद्धजनैः सह ऐक्यमतेन संस्थापरिचालनं सर्वकारैः अवश्यं कर्तव्यम्। शिक्षाव्यवस्था प्रशासनिककार्यदृष्ट्या अवलोक्यं प्रशासनिकाधिकारिभिः संस्था परिचाल्यते। इयमेव महती समस्यास्ति। अतः सर्वकारैः कीदृशाः नियोक्तव्याः कीदृशाः च दूरीकर्तव्याः इति सर्वकारैः प्रलेखेऽस्मिन् व्याख्यातव्यम्। इदपि दृश्यते यत् भारते जीविकानिवृत्त्यनन्तरं उच्चपदस्थाः सैनिकाः तथा अधिकारिणः विश्वविद्यालयानामुपकुलपतित्वेन नियुक्ताः भवन्ति। किन्तु तथा न करणीयम्। नूतननामकरणपूर्वकं मंत्रालयस्य प्रशासनिकव्यवस्थासु शिक्षाविदामेव कृते प्रमुखपदं दातव्यम्। येन शिक्षायाः शिक्षाव्यवस्थायाः च उन्नतिः स्यात्। यथा - सीबीएसई, विश्वविद्यालयस्य कुलसचिवपदं, मंत्रालयस्य सचिवपदमिति सर्वेषु पदेषु प्रशासनिकाधिकारिणः

सन्ति। एतत्तु सर्वकारैः द्रष्टव्यम्। ये आधिकारिणः महत्यां संस्थायां कार्यं कुर्वन्तः सन्ति तथा उच्चोपाधिं प्राप्तवन्तः उत शोधकार्ये भागग्राहिणं सन्ति तादृशाः एतेषु पदेषु स्थातुमर्हन्ति। २०२० संवत्सरस्य ७ अगस्त् इति दिनाङ्के यूजीसी संस्थया आयोजिते राष्ट्रीयसंवादसम्मेलने प्रधामन्त्रिभिः नरेन्द्रमोदीवर्यैः उक्तं यत् ३४ वत्सरेभ्यः अनन्तरं शिक्षानीतिः परिवर्तितास्ति। अस्य विस्तरविषये तथा प्रश्नविषये ध्यातव्यम्। शिक्षानीतेः नूतनरूपप्रणयात् प्रागेव प्रश्नद्वयमस्माभिः समाधेयम्। प्रथमं तावत् इयं शिक्षानीतिः भाविनि काले सृजनाकार्यं, कुतूहलं, प्रतिबद्धता इति विषयेषु जनान् बध्नाति वा? द्वितीयं तावत् किमस्माकं शिक्षाव्यवस्था सशक्तिकरणे सिद्धा वा? प्रधानमन्त्रिभिः उक्तं यत् "यदा बालाः नूतनप्रौद्योगिकं पठन्ति तदा तेषां भाविनि काले प्रस्तुतिविधाने सौकर्यं भविष्यति। बहुदिनेभ्यः शिक्षानीतिः न परिवर्तितास्ति, अतः समाजे भिन्नं प्रोत्साहनं लभते स्म। क्वचित् वैद्यः, अभियन्ता, न्यायवादी इति जीविकायाम् उत्साहः दृष्टः। अधुना युवास्वयंविचारणाशक्तिः अग्रे गच्छति, पठनमात्रं न वार्किंग कल्चर् अपि वर्धते।(aajtak.in, नई दिल्ली, 7 August, 2020)" सर्वकारैः उद्घोषिते नूतनप्रलेखे शिक्षाक्षेत्रे जीडीपी इत्यर्थं 6% व्ययस्य कथनमस्ति। केन्द्रीयसर्वकारेण राज्यसर्वकारेण यदि 6% जीडीपी व्ययं कर्तुं न शक्नोति तदा यद्वा कल्पनं कथनं च प्रलेखे भवतु नाम आर्थिकसंसाधनाभावे सर्वं संव्लीनं भवति। अस्यां नूतनशिक्षाव्यवस्थायां ये स्वतन्त्रविश्वविद्यालयाः आपतन्ति तेषामुपरि नियन्त्रणं भवेत् तथा भारतीयविश्वविद्यालयसदृशः वैदेशिकविश्वविद्यालयानां महत्त्वं न भवेत। कोचिंगसस्थानां दुष्प्रभावविषये अपि सर्वकारैः चिन्तनीयम्। लक्षाधिकाः छात्राः कोचिंगसंस्थानं गत्वा स्वजीवनस्य उद्देश्यं लब्धुं प्रयतन्ते। एताः कोचिंगसंस्थाः दूरीकर्तव्याः। अनेन तु समानस्तरीयविद्यालयेषु महाविद्यालयेषु शिक्षां प्राप्य स्वजीवनस्योद्देश्यं पूरयितुं शक्यते। कोचिंगसंस्थाहेतोः भारतवर्षे सामाजिकार्थिकभेदभावः जातः। नूतना शिक्षानीतिः(२०२०) यदि समयानुगुणं प्रयुज्यते तर्हि भारतवर्षः ज्ञानक्षेत्रे विश्वगुरुत्वेन प्रतिष्ठां लप्स्यते। डॉ सञ्जयकुमारमहोदयः, जाकिर हुसैनमहोदयः दिल्लीविश्वविद्यालयस्य इवनिंगकॉलेज् इत्यस्य राजनीतिविभागे कार्यं कुर्वन्तौ स्तः। तयोः अभिमतमिदम्।

**राष्ट्रीय शिक्षानीतिः २०२० – भारतीयोच्चशिक्षायाः भविष्यत्कालस्य पुनर्निर्माणम्**

एनईपी २०२० भारतोच्चशिक्षायाः इतिहासे निर्णायकक्षणं तथा नीतिरियं प्रशंसार्हास्ति। यतो हि एनईपी २०२० इत्यस्य व्यवस्थापनार्थम् एनईपी समितेः अध्यक्ष डॉ कस्तूरीरंगनः तथा तत्सहयोगिनः उपस्थिताः आसन्। ते एनईपी २०२० इत्यस्य अधीने संस्तुतिपत्रस्य निर्माणं कृतवन्तः। अस्याः नीतेः प्रभावबलेन समयवबद्धकार्यान्वियनस्य साहाय्येन नूतनः भागः अधिक्रियते। एतानि १० संशोधनानि विहाय अपि एनईपी २०२० इत्यत्र नूतनां व्यापकामेकीकृतां शिक्षायोगं निर्मातुं उच्चशिक्षाप्रणाल्याः विनियामकवास्तुकलायाः परिभाषणं कृतम्। तथा मानवसंसाधनविकासमंत्रालयस्य नामपरिवर्तनं कृत्वा शिक्षामंत्रालयः कृतम्। एनईपी २०२० इत्यस्य प्रयोगे माननीयानां प्रधानमन्त्रिवर्याःतथा माननीयानां केन्द्रीयमंत्रिणः दृष्ट्या संस्थागतप्रतिज्ञां तथा व्यवहारं च प्रति ध्यानं दद्यात्। अखिलोच्चशिक्षापारिस्थितिकीतंत्र, विशेषरूपेण सर्वकारीयाः संस्थाः, नियामकनिकायानां परिवर्तनं, संशोधनं, पुनः कल्पनं, परिवर्तनस्य निम्नलिखितानां पञ्चानां प्रमुखविषयानां स्वस्य प्रतिबद्धकरणाय आवश्यकतास्ति।

1. **विश्वासनिर्माणम्** – सर्वकारीयसंस्थासु, नियामकसंस्थासु, उच्चशिक्षासंस्थासु विश्वास-सम्मान-कॉलेजियम् इत्येतेषां निर्माणस्य आवश्यकता वर्तते। वर्तमाने इयं महती प्रतिज्ञारूपासति। एकीकृतविकासे तथा देशस्य शक्तिशाल्युच्चशिक्षाप्रणाल्यर्थं विहिते प्रयासे प्रभावं प्रदर्शयति।
2. **पारदर्शी तथा समीचीनः निर्णयः** - समयबद्धरीत्या सर्वकारीयसंस्थासु नियामकसंस्थासु च द्रुतनिर्णेतुं सुदक्षयुतम् चिन्त्यहेतुकमुत्तरदायित्वयुतं तंत्रमावश्यकम्। प्रयासेऽस्मिन् बाधोऽस्ति। मूल्यवन्तं समयं निर्णेतुं विविधमुहुर्तेषु लुप्तो भवति।
3. **संस्थागतस्वतंत्रता** – उच्चशिक्षसंस्थानस्य दायित्वपूर्वकं निर्णयग्रहणे तथा संस्थाभि सह निहितप्रश्नोत्तरार्थं सशक्तिकरणस्य आवश्यकतास्ति। अधिकशक्तिप्रयोगस्य आवश्यकतापि अस्ति। अस्यां प्रक्रियामुच्चशिक्षासंस्थाभ्यः दायित्वं देयम्। येन एनईपू २०२० इत्यस्य कार्यान्वयनाय अधिकरूपेण प्रभावपूर्वकं योगदानं कर्तुं शक्यते।
4. **सक्रिय तथा योगदानात्मकः परामर्शः** – सर्वकारीयसंस्थाभिः नियामकसंस्थाभिः च उच्चशिक्षासंस्थानेन सह प्रचारकस्य सहभागीपरामर्शतंत्रस्य आवश्यकतास्ति। विशेषतया नूतननियमानां प्रयोगः तथा स्थितनियमानां संशोधनं येन संस्थाः प्रभाविताः भवन्ति। हितधारकपरामर्शसमितिः यत्र विनिमयहेतोः प्रभावितसंस्थाः नियमनिर्माणात् प्रागेव परामृष्टाः भवन्ति।
5. **आईओई तथा स्वायत्तसंस्थानां सशक्तीकरणम्** – इंस्टीट्यूशन् ऑफ एमिनेंस् इत्यस्य सशक्तीकरणस्य आवश्यकतास्ति। यः विश्वविद्यालयः वैश्विकस्थाने उच्चस्थामाप्तुं प्रयतते। तेन च भारतीयविश्वविद्यालयानां दृष्टिः पूर्णा भवति। तेभ्यः अधिकां स्वायतत्ता तथा स्वतंत्रता प्रदातव्या।

**एनईपी २०२० इत्यत्र भारतीय-उच्चशिक्षाक्षेत्रं परिभाषणाय महन्तः १० विचाराः -**

1. **उत्कृष्टतोद्दिश्य विश्वस्तरीयशिक्षा** – अत्र दृढतया विश्वस्तरीयायः उच्चशिक्षाप्रणाल्याः निर्माणस्य आकांक्षा कृतास्ति। इयं तु भारतस्य भविष्यनिर्माणे तथा ज्ञानपरसमाजनिर्माणे महत्वपूर्णास्ति।
2. **बहुविषयिणी उदारशिक्षा** – अत्र एसटीईएम् नाम विज्ञानं, तथ्यप्रयुक्तिः, इंजीनियारिंग्, मेडिसिन् इत्यादिभिः अध्ययनैः सह लिबरल् आर्टस्, मानविकी, सामाजिकविज्ञानादिभिः च सह एका उदारा बहुविषयिणी अंतरानुशासनात्मकशिक्षापारिस्थितिकीतंत्रनिर्माणस्य परिकल्पना कृतास्ति।
3. **विनियामकसशोधनं तथा सार्वजनिकस्वविभाजनस्य छेदनम्** – अत्र सार्वजनिके निजविश्वविद्यालये प्राचीनान् अवरोधान् तथा भेदान् दूरीकृत्य उच्चशिक्षायां मूलभूतं महत्वपूर्णंच विनियामकं संशोधनं कृतमस्ति।
4. **गुणयुताश्वासनं तथा विस्तारः** – अत्र विस्तारः, प्राप्तिः, एकत्रीकरणं, समावेशः, उत्कृष्टता इत्यादिभिः सह सम्बन्धिता नीतिः ध्यातव्या। एताः समानरूपेण महत्वपूर्णाः लक्ष्यस्वरूपाः तथा आकाङ्क्षाः यासां युगपत् आपूर्तिः करणीया।

5. **रिसर्च् इकोसिस्टम्** – अत्र अनुसंधाने तथा नवाचारसंस्कृतौ दृष्टिपातः कृतोऽस्ति। भाविनि काले उच्चशिक्षायाः कल्पनस्य केन्द्रबिंदुरस्ति। शिक्षायामुच्च जीडीपीनिवेशस्य परिकल्पनावेलायां राष्ट्रीयानुसंधान-फाउंडेशन् इत्यनेन अनुसंधानस्य महत्वपूर्णधनप्रोत्साहनाय तथा अनुदानाय प्रयासः कृतः।
6. **फैकल्टी फोकस्** – संकायसदस्यः उच्चशिक्षाप्रणाल्याः महत्वपूर्णः पक्षोऽस्ति। अत्र मेंटरिंग्, रिटेंशन्, प्रोत्साहनम्, उपलब्धिः, संकायविकासः इत्यादिकार्यक्रमेषु अधिकमवधानपूर्वकमुत्कृष्टाधिकारिकाणां नियोगाय मार्गः प्रशस्तः कृतोऽस्ति।
7. **शासनं तथा नेतृत्वम्** – अत्र प्रशासनिककार्ये तथा संस्थानिर्माणस्य प्रयासे शासनस्योपरि तथा नेतृत्वस्योपरि महत्वं प्रदत्तमस्ति। यत्र संस्थायाः प्रभावशीलतायाः सर्वं स्वरूपं नेतृत्वरूपेण प्रशासनिकरूपेण निर्भरति।
8. **शैक्षणिकस्वतंत्रता तथा संस्थागतस्वायत्तता** – अत्र डिग्रीकार्यक्रमस्य अवधिनिर्धारणे पर्याप्तस्वतंत्रतया शैक्षणिकायाम्यत्वेन च सह वित्तपोषणं, पाठ्यक्रमविकासः,छात्राणां नामाङ्कनं, संकायनियोगे शैक्षणिकस्वतंत्रता, संस्थागतस्वायत्तता इत्यादीनां महत्वं रेखांकितमस्ति।
9. **सार्वजनिकानुदानं तथा स्वकीयः परोपकारः** – उच्चशिक्षायां जीडीपीनिवेशे वृद्धिपूर्वकं वित्तपोषणस्य रूपरेखा सुदृढा कृतासीत्। तथा परोपकारस्योपरि बलं प्रदर्शयितुं सार्वजनिक-स्वकीययोः द्वयोः क्षेत्रयोः भूमिका मन्यते।
10. **अंतर्राष्ट्रीयकरणं प्रत्यायनं डिजिटलीकरणं च** – जगत्यस्मिन् प्रमुखविश्वविद्यालयैः सह वैश्विकभागग्रहणाय अंतर्राष्ट्रीयकरणस्य महत्वमाश्रितम्। विश्वविद्यालयानां मान्यतां तथा वैश्विकादर्शमानं दृढतया अवलोकितम्। यत्र क्रमसंख्या अप्यस्ति। उच्चशिक्षायाः डिजिटलीकरणाय महत्वपूर्णसमर्थनं तथा अन्तर्जालीयशिक्षावर्धनाय डिजिटल्बुनियादीनिर्मणोन्नयनस्य आवश्यकता चेति परिकल्पितमस्ति।

**उपसंहारः**

भारतवर्षे अधुना सहस्राधिकाः उच्चशिक्षणसंस्थाः(HEI) सन्ति। यत्र १५० संख्यकाः संस्थाः राष्ट्रियीमहत्वयुताः सन्ति। समयानुगुणम् एताः वैज्ञानिकानुसंधानस्य केन्द्रत्वेन परिणताः। गतदशके उच्चशिक्षासंस्थानेषु शोधसंख्या तथा तस्याःगुणवत्ता इति द्वयोःक्रमवर्धनं प्रदर्शितमस्ति। भारतीयज्ञानपरंपरा-संस्कृतिभ्यां संबन्धितमैतिह्यं संरक्षितं, तदनुसन्धातुं, बहुज्ञतां वर्धयितुमेका बहुविषयकाखिलशिक्षाभूमिकायाः निर्माणाय तथा भारतीयभाषायाः शिक्षाप्रक्रियामाधारभूतरूपेण संस्थापयितुं, सर्वेषु स्तरेषु शिक्षायाः समन्वयं साधयितुं, सदा मूल्याङ्कन-बहुभाषिकता-स्वायत्ततादीनां प्रोत्साहितुमियं शिक्षानीतिः भारतीयपरम्परा-परिवेश-युगानुकूलावश्यतायाः अनुकूलास्ति। अस्यां शिक्षानीतौ पूर्वशिक्षानीतेः कस्यचन कार्यस्य यः प्रयासः संकल्पश्च दृष्टः सः प्रशंसनीयोऽस्ति। अत्र ज्ञानविज्ञानयोः एकस्याः विशिष्टप्रणाल्याः निर्माणोपस्थापनस्य प्रयासः विहितः। यत्र जनानां क्षमता, रुचिः, जीविकावसरः, प्रशिक्षणमित्यादीनामीक्षणं विस्तृतरूपेण कृतमस्ति। भारतीयपरिवेश-परंपरानुकूला इयं शिक्षानीतिः भारतीयताप्रतिष्ठादृष्ट्या निर्णायकत्वेन सिद्धा भवति। एकविंशतिशताब्द्यां भारतवर्षस्य अस्यां प्रथमायां महत्वाकांक्षीशिक्षानीतौ भारतीयपरम्परां सांस्कृतिकमूल्यं च अक्षुण्णयन् नूतनशताब्द्याम् आकांक्षात्मकं लक्ष्यमाप्तुं प्रयासः कृतः। अस्यां शिक्षानीतौ बहुमूल्या शिक्षा तथा तत्सम्मुखीकरणाय प्रयासविधानस्य संकेतः लभ्यते। अस्याधीने शिक्षाशुल्कस्य उच्चतमस्तरनिर्धारणस्य दिशायामेकस्याः विशिष्टप्रणाल्याः विकासाय तथा छात्रवृत्त्यर्थं वार्तालापः जातः। इयं शिक्षानीतिः न केवलं कार्यसाधनरूपा अपि तु परीक्षायामुत्तीर्णतायाः माध्यमरूपास्ति। जगत्यस्मिन् चिन्तामुक्तानामस्माकं जीवनमुडुपेन भवसागरमवतरितुं शक्यते। स्वामिविवेकानन्दैः उक्तम् - "शिक्षा मनुष्येभ्यः देवत्वं यच्छति।" पाठ्यक्रमः व्यापको भवति न तु संकुचितः। अधिकारः तथा राष्टं प्रति कर्तव्यमनेन कारणीयम्। येन राष्ट्रभक्तिः तस्मिन् जागरयेत् वर्धयेत् च। एतदर्थमियं नूतना शिक्षानीतिः निर्मितास्ति। शिक्षानीतौ ज्ञानम्, उचितमाचरणं, प्रौद्योगिकदक्षताशिक्षणं, विद्याप्राप्तिःइत्यादिभिः सह व्यापारः, मानसिकनैतिकता, सौन्दर्यविषयः इत्येते सन्ति। स्वामिचरणैः पुनश्चोक्तम् - "मानवानामन्तर्निहितपूर्णतायाः अभिव्यक्तरणमेव शिक्षा" इति। तथा चोक्तं "स्वबलं जीवनेन समन्वय्य राष्ट्रस्य सामाजिकार्थिकविकासाभ्यां राष्ट्रकल्याणाय च शिक्षा मुख्या भवति" इति।

**इदं राष्ट्राय इदन्न मम।**

**संदर्भसूची**

1. नवभारत टाइम्स दिनांक ११ अगस्त २०२० दिल्ली एडिशन्।
2. नवभारत टाइम्स दिनांक ८ अगस्त दिल्ली एडिशन्।
3. दि इकॉनोमिक्स टाइम्स १७ दिसम्बर २०१९।
4. Anganvadi Sevikas Posted on 12 july2019, ministry of Women and Child Development, Govt. of India.
5. राष्ट्रियशिक्षानीतिः २०२०।
6. MHRD(2020) : "National Education Policy 2020", Ministry of Human Resource Development, Government of India, New.
7. www.m.livehindistan.com
8. www.m.jagran.com
9. www.hastakshep.com

10. www.devbhoomimedia.com
11. www.m.dailyhut.com
12. www.I chowk.in
13. www.hindi.gktoday.in
14. www.pmmodiyojana.in
15. www.drishtiias.com
16. www.dikshantias.com
17. www.newplus.wemedia.co.in
18. www.navlharattimes.indiatimes.com
19. www.naidunia.com